# पुराणेषु प्रतिपादितानि जीवनमौल्यानि

**Shrinivas Phadnis**

Reasearch Scholar, Shrinivasan University, Mangalore.

DOI: https://doi.org/10.5281/zenodo.15796275

## ABSTRACT:

भारतीय वाङ्मयेषु भगवतः स्वरूपं, जगतः सृष्टिविशेषं,जीवानां कर्तव्यं बोधयितुं ,तथैव चतुर्विध पुरुषार्थान साधयितुं वेद वाङ्मयस्य साररूपेण अष्टादश पुराणाः प्रवर्तन्ते. भगवान वेदव्यासः वेदविभागं कृत्–वा ब्रह्मसुत्राणि रचयित्वा महाभारतमपि कृत्वा अष्टादश पुराणानि रचितवन्तः. एतादृश पुराणेषु लौकिक विषयाः अलौकिक विषयाः दृष्टान्तसहित सूत शौनकादि ब्रह्मनारदादि संवादरूपेण उपकुर्वन्ति.

पुराणस्य प्राचीनता तथा अर्थ

पुराण शब्दस्य एवं अर्थः अस्ति

१) पुरा अपि नवं नित्य नूतनं सत्य सनातनं

शतकोटी श्लोक प्रविस्तरं वाङ्मय प्रपञ्चः एव पुराणं

भगवान वेदव्यासः पुराण विषये एवं अभिप्रैति

२) पुराणां सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम

नित्यं शब्दमयं पुण्यं शतकोटी प्रविस्तरं

३) पुरा पुराणमेव आसीत शतकोटी प्रविस्तरं

व्यासरूपमहं कृत्वा संहरामि युगेयुगे

चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा

तथा अष्टादशधा कृत्वा भूलोकेस्मिऽन प्रकाश्यते

आचार्य शंकरोऽपि ब्रह्मसुत्र भाष्ये ऋषिणामपि मन्त्र ब्राह्मणादीनां सामर्थ्यं

न अस्मदीयेन सामर्थ्येन उपमातुं युक्तं तस्मात समूलं इतिहास पुराणमिति।

## KEYWORDS:

पुराणम्, संवादः, जीवनमौल्यानि, ज्ञानम्, परम्परा.

## पुराणेषु प्रतिपादितानि जीवनमौल्यानि

भारतीय वाङ्मयेषु भगवतः स्वरूपं, जगतः सृष्टिविशेषं,जीवानां कर्तव्यं बोधयितुं, तथैव चतुर्विध पुरुषार्थान साधयितुं वेद वाङ्मयस्य साररूपेण अष्टादश पुराणाः प्रवर्तन्ते. भगवान वेदव्यासः वेदविभागं कृत्वा ब्रह्मसुत्राणि रचयित्वा महाभारतमपि कृत्वा अष्टादश पुराणानि रचितवन्तः. एतादृश पुराणेषु लौकिक विषयाः अलौकिक विषयाः दृष्टान्तसहित सूत शौनकादि ब्रह्मनारदादि संवादरूपेण उपकुर्वन्ति.

## पुराणस्य प्राचीनता तथा अर्थ

## पुराण शब्दस्य एवं अर्थः अस्ति

१) पुरा अपि नवं नित्य नूतनं सत्य सनातनं
शतकोटी श्लोक प्रविस्तरं वाङ्मय प्रपञ्चः एव पुराणं

## भगवान वेदव्यासः पुराण विषये एवं अभिप्रैति

२) पुराणां सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम
नित्यं शब्दमयं पुण्यं शतकोटी प्रविस्तरं

३) पुरा पुराणमेव आसीत शतकोटी प्रविस्तरं
व्यासरूपमहं कृत्वा संहरामि युगेयुगे
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा
तथा अष्टादशधा कृत्वा भूलोकेस्मिऽन प्रकाश्यते

आचार्य शंकरोऽपि ब्रह्मसुत्र भाष्ये ऋषिणामपि मन्त्र ब्राह्मणादीनां सामर्थ्यं

न अस्मदीयेन सामर्थ्येन उपमातुं युक्तं तस्मात समूलं इतिहास पुराणमिति।

## पद्म पुराणोक्त जीवनादर्शाः

इदं पुराणं ब्रह्म नारद संवादरूपः तथा पार्वती परशिवसंवादरूपेणापि अस्ति

न केवलं वाल्मीकि रामायणे परन्तु पद्मपुराणेऽपि भागवान रामस्य

आदर्शगुणाः जीवनमौल्याश्च निरुपिताः तत्र श्रीरामः मातापित्रोः वचनं परिपालनं सूर्यवंशस्य धर्म संरक्षणार्थं परम्परा प्राप्तस्य पट्टाभिषेकं त्यक्–त्वा सीतालक्ष्मणेन सह चतुर्दशवर्षाणिपर्यन्तं वनवासं कृतवान. वनगमनस्–मये कैकेय्यीं वा भरतं वा दशरथं वा न निन्दितवान. पट्टाभिषेकस्य सिद्धता. यः मन्दहासः रामस्य मुखे आसीत तत मन्दहासः वनगमनस्–मयेऽपि आसीत

एवं च वनगमनसमये श्रीरामः सर्वान प्रजान उद्दिश्य एवं आदेशं कृतवान

या प्रीतिः बहुमानश्च मयि अयोध्या निवासिनां
मत्प्रीयार्थं विशेषेण भरते अपि निवेश्यतां
स हि कल्याणचारित्र्य कैकेय्यानन्दवर्धनः
इदं रामस्य उदात्तगुणं पद्मपुराणः प्रकटीकरोति

## भागवत पुराणोक्त आदर्शगुणाः

भगवान श्रीकृष्णः अवतारं कृत्वा मर्त्यावतारस्तु इह मर्त्य शिक्षणं इति वचनानुसारेण स्वस्य जीवनेन सः न मानवः किन्तु माधवः एव निरूपितवान. प्रथमतया लोककण्टक कन्सादिन संहृत्य उग्रसेनस्य तथा वसुदेव देवक्याः बन्धनं मोचितवान तदनन्तरं बलराम सुधामेन सह गुरुकुलं गत्वा सान्दिपिनेः मुखात चतुषष्टी दिनपर्यन्तं अध्ययनं कृत्वा गुरुदक्षिणामपि दत्तवान तदनन्तरं भीमेन जरासन्धादि दैत्यान संहारं कृतवान. गोपीकास्त्रीणां गृहंगत्वा ताभिः समर्पित दधिपयानि स्वीकृत्य अनुग्रहं कृतवान. तथैव रासक्रीडामुखेन स्वस्य महिमां प्रदर्श्य, तदनन्तरं गोवर्धनपर्वत धारणेन सर्वान रक्षितवान. अन्ते अक्रूर उद्धवादि भक्तेभ्यः पुरुषार्थ साधनस्–य उपदेशमपि कृतवान. एवं कृष्णावतारेणापि जीवनमौल्यान अवगन्तुं शक्यः.

## विष्णु पुराणोक्त आदर्शगुणाः

इदं पुराणं पराशर मैत्रेय ऋषेः संवादरूपमस्ति विष्णुपुराणमपि भागवतपुराणमिव परमश्रेष्टः परमोपदेशकः ग्रन्थः अस्ति. अत्र प्रथमतः उत्तानपाद राज्ञः पुत्रस्य ध्रुवकुमारस्य मातुः सुनीतेः उपदेशेन तथा नारदस्–य उपदेशेन वनं गतवान. तत्र षण्मासपर्यन्तं तपः कृत्वा भगवतः साक्षात्कारं

प्राप्तवान. तपसानन्तरं पुरप्रवेशं कृत्वा प्रथमतया सापत्नीमातरं सुरुचिं प्रति नमस्कृतवान. तदनन्तरं स्वमातरं प्रति नमस्कृतवान. अत्र एवं नीतिः वर्णितः यत भगवतः साक्षात्कारस्य पूर्वमेव रागद्वेषाणि भवन्ति, परन्तु साक्षात्कारनन्तरमपि यदि रागद्वेषाणि भवन्ति. चेत तत्र साक्षात्कारस्य कः अर्थः ? अतः ध्रुवकुमारः प्रथमतया सुरुचिं प्रति नमस्कृतवान. तथैव वनगमनसमये तस्य माता सुनीतिरपि उपदेशं कृतवती. अतः ध्रुवकुमारः सुरुचिं प्रति प्रथमतः नमस्कारेण रागद्वेषरहितस्य जीवनस्य नीतिं प्रतिपादितवान.

विष्णुपुराणस्य अन्यः एकः सार्वकालीकनीतिः एवं भवति. तानि एव. द्वादश संख्याकाः यमनियमाः एतादृश यमनियमेषु अत्र केचन उद–ाहृताः सन्ति.

यमाः

१. अहिंसा ;– इत्यत्र हिंसारहितवर्तनं जीवनम

२. सत्यं ;– इत्यत्र यत सतां हितम तत सत्यं इत्यभिधीयते अर्थात यस्–य व्यवहारेण आचरेण ज्ञानिनः तुष्यन्ति,तत सत्यं .

३. असंगः इत्यत्र अज्ञानिनां संगराहित्यमेव असंगः

नियमाः

१. शौचं ;– इत्यत्र आचारविचारेषु शुद्धता प्रामाणिकत्वमेव शौचं

२. तपः ;– इत्यत्र तपः आलोचनं प्रोक्तं इति वचनानुसारेण निरन्तरं भगवध्यानं इत्यर्थः

३. श्रद्धा ;– इत्यत्र भगवतः विषये जगतः सत्यत्व विषये आस्तिक्यबुद्धिरेव श्रद्धा

कूर्म पुराणोक्त जीवनादर्शाः

इदं पुराणम कुर्मरूपी भगवान ,तथा चतुर्मुख ब्रह्मणः संवादरूपेण अस्ति. अस्मिन पुराणे आश्रमधर्माः निरुपिताः सन्ति. तानि ब्रह्मचर्य, गृहस्थ,वानप्रस्थ,सन्यासेति चत्वारो भागाः सन्ति.

अत्र चतुराश्रमावलम्बिनः कथं जीवनं करोतु इति उपदेशः,तेषां साधनानि, जीवनक्रमादिकं, सात्विकादिगुणाः ,कथं सम्पादनीयं इति

निरुपितः अत्र एकः विशेषः अस्ति. सामान्यतया गृहस्थाश्रमानन्तरं सन्यास स्वीकारः योग्यः इति सामान्यरूढिः.परन्तु ब्रह्मचर्य आश्रमेणैव सन्यासं स्वीकर्तुं योग्यः इति अस्य पुराणस्य विशेषः.

अस्य पुराणस्य अन्यः एकः विशेषः अस्ति. हिमवान पार्वत्याः स्तोत्रं कृतवान पार्वती हिमवन्तं प्रति स्वस्य स्वरूपं दर्शयित्वा उपदेशमपि कृतवती. तथा च अस्मिन पुराणे पार्वत्याः सहस्रनामो वर्तते.

अत्र वामनरुपी परमात्मना आदर्शगुणाः चित्रिताः बलिचक्रवर्तिः शताश्वमेधान कृतवान भगवान तस्मै एवं उक्तवान एकमन्वन्तरस्य एकः एव इन्द्रः इदं कालनियमः. भवान शताश्वमेधान कृतवान.तत्कर्म हानिः न भवति. परन्तु प्रयोजन एव भवति. आगामि मन्वन्तरे भवन्तं एव इन्द्रं करोमि. तावत्कालपर्यन्तं तव गृहपालः भूत्वा रक्षणं करोमि इति उक्त्वा अनुग्रहं अकरोत

बलिचक्रवर्तेः किञ्चित अहंकारं आसीत तत अहंकारं भगवान दण्डनं अकृत्वा दानयाचनेन तं सात्विकं अकरोत इदं अस्मिन पुराणे वर्तमान जीवनमौल्याः

मत्स्य पुराणोक्त जीवनादर्शाः

इदं पुराणं मत्स्यरूपि भगवतः ,तथा वैवस्वत मनोः संवादरूपेण अस्ति. अस्मिन पुराणे ब्रह्मदेव कृत श्रीलक्ष्मीनरसिंह स्तोत्रः विशेषतया वर्तते, यः इदं स्तोत्रं पठति तस्य सर्वसिद्धिः भवति. ब्रह्मोवाच

भवान ब्रह्मा च रुद्रश्च महेन्द्रो देवसप्तमः
भवान कर्ता विकर्ता च लोकानां प्रभवः अव्ययः
परां च सिद्धिंच परं च देवं
परं च मन्त्रं परमं हविश्च
परं च धर्म परमं च विश्वं
त्वामाहुरग्र्यं पुरुषं प्रमाणम

अस्य पुराणस्य अन्यः एकः विशेषः अस्ति. भगवान महारुद्रः स्वस्य मध्यमनेत्रेण कामं भस्मीकृतवान तदा कामस्य पत्नी दुःखदग्धरतिः. महादेवस्य स्तोत्रं कृतवती. एतत स्तोत्रं बहु अपरुपं शीघ्रफलकारि वर्तते. तत स्तोत्रं एवं अस्ति.

नमः शिवायास्तु निरामयाय
नमः शिवायास्तु मनोमयाय
नमः शिवायास्तु सुरार्चिताय
तुभ्यं सदा भक्तकृपापराय
नमो भवायास्तु भवोद्भवाय
नमोस्तु ते ध्वस्तमनोभवाय
नमोस्तु ते गूढ्महाव्रताय
नमोस्तु ते मायागहनाश्रिताय

एवं अस्मिन पुराणे जीवनोपयुक्तानि स्तोत्राणिसन्ति.

## गरुड पुराणोक्त जीवनादर्शाः

इदं पुराणम भगवान विष्णु,तथा गरुड्देवस्य संवादरुपेणास्ति.अस्मिन पुराणे अनेकविध जीवनांशाः,उपदेशाः,साधनमार्गः कथं ? तथा च पाप कार्येण किं भवति ? पुण्यकार्येण किं भवति ? तथा च दानस्य प्रभावः तथैव मोक्ष साधनं कथं भवितुं शक्यः ? इत्यत्र निरुपितः

प्रथमतः नरकवासिनः यमदूतान प्रति स्वस्य पापविमोचनं कर्तुं प्रार्थयन्ति. तदा यमदूताः तान प्रति एवं उपदिशति.

गतसार्द्धमपि नो दत्तं नश्च वायसयो बलिम
नमस्कृता नातिथर्यो न कृतं पितृतर्पणम
यमस्य चित्रगुप्तस्य न कृतं ध्यानमुत्तमम

न जप्तश्च तयोः मन्त्रोः न भवेध्येन यातना
नापि किञ्चित कृतं तीर्थं पूजिताः नैव देवताः
गृहाश्रमस्थितेनापि हन्तकायोऽपि नोद्धृतः

शास्त्रेषु अन्धं तमः प्रविशन्ति ये अविध्यां उपासते इति सुक्तिः अस्ति. तस्य विवरणमपि गरुडपुराणे बहुसुन्दरतया अस्ति.

केवलेन हि अधर्मेण कुटुंबभरणोत्सुकः
याति जीवो अन्धतामिस्रं चरमंतमसः पदम

दानस्य प्रभावः एवमस्ति.

अदत्तदानात भवेत दरिद्रो दरिद्रभावाच्छ करोति पापम
पापः प्रभावान नरके प्रयाति पुनः दरिद्रः पुनरेव पापी

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि

जीवस्य मरणान्तिक समये किं करणीयमिति ?तथैव भगवन्नाम महिम्ना अत्र दृश्यते.

मत्स्यः,कूर्मो वराहश्च नारसिंहश्च वामनः
रामो रामश्च कृष्णश्च बुद्धः कल्की तथैव च
एतानि दश नामानि स्मर्तव्यानि सदा बुधैः
समीपे रोगिणो ब्रुयुः बान्धवास्ते प्रकीर्तिताः.
कृष्णेति मगलं नाम यस्य वाचि प्रवर्तते
तस्य भस्मी भवन्त्याशु महापातक कोटयः
अत्र जीवनस्य असारता अपि सुन्दरतया वर्णितः
धनपुत्र कलत्रादि शरीरमपि बान्धवाः
.अनित्यं सर्वमेवेदं तस्माद्धर्मं समाचरेत.
तावत बन्धुः पिता तावत यावत जीवति मानवः
मृतानामन्तरं ज्ञात्वा क्षणात स्नेहो निवर्तते
एवं अत्र अनेक विध जीवनांशाः विध्यन्ते

## नरसिंह पुराणोक्त जीवनादर्शाः

इदं पुराणं सुतपुराणिक भारद्वाज ऋषेः संवादरूपः अस्ति. अस्मिन पुराणे मार्कण्डेय ऋषेः जन्म,तस्य अल्पायुष्य विषये ऋषिणां वचनम तदनन्तरं आश्रमवासिनां ऋषेः आशिर्वादबलेन मृत्युं जितवान तथैव भगवतः प्रळयकालस्य दर्शनमपि प्राप्तवान एवं ब्राह्मणानां आशिर्वादबलेन च भगवती कृत भक्तिबलेन मृत्युमपि जेतुं शक्यः इति नीतिः अत्र प्रदर्शितः .एवंच अत्र मार्कण्डेय चरित्रं बहुविस्तृतया वर्णितः

अत्र अन्यः एकः विशेषः अस्ति संसारस्य स्वरूपः तस्य परिहारोपायः अपि अत्र सुन्दरतया वर्णितः

इत्येवं कथितं वत्स संसारवृक्षलक्षणम

व्यक्तमेव समारूढाः मोहमायान्तिदेहिनः
संसरन्तीह सततं सुखदुःख समान्विताः
प्रायेण प्रकृता मर्त्याः ब्रह्मज्ञान परांमुखाः
छित्वैनं कृतीनां यान्ति नो यान्ति ब्रह्मज्ञानिनः

कर्मक्रिये महाप्राज्ञ नैनं छिन्दन्ति दुष्कृताः
एनं छित्वा च भित्वा च ज्ञानेन परमासिना
ततो अमरत्वं ते यान्ति यस्मान्नावर्तते पुनः

तथैव प्रल्हादस्य भक्तिः तस्य उपासना बलेन भगवान श्रीहरिः नरसिंहरूपेण अवतीर्य हिरण्यकश्यपुं हत्वा प्रल्हादं प्रति अनुग्रहं कृतवान इत्यादि अंशाः अत्र निरुपितः

मार्कण्डेय पुराणोक्त जीवनादर्शाः

इदं पुराणम चतुर्मुख ब्रह्मणः तथा जैमिनी ऋषेःसंवादरूपः अस्ति. अत्र मार्कण्डेय महर्षिः पुराणाचार्य पदवीं कथं प्राप्तवान ? इति वर्णितः एवं सुकृषु महर्षिः धर्मस्वरूपान चत्वारि पक्षिणं प्रति कृतोपदेशं अत्र अस्ति. अस्मिन पुराणस्य प्रधान विषयः सत्यवचन परिपालनम

सत्येनार्कः प्रतपति सत्यं तिष्टति मेदिनी
सत्यं चोक्तं परोधर्मः स्वर्गः सत्यं प्रतिष्टितः
अश्वमेध सहस्रं च सत्यं तुलया धृतं
अश्वमेध सहस्राद्धि सत्यमेव विशिष्यते.
स्मशानवत वर्जनीयः नरः सत्य बहिष्कृतः
नातः परतरं धर्म वदन्ति पुरुषस्य तु
यादृशं पुरुष व्याघ्र स्वसत्य परिपालनम

अत एव सत्यस्य महिमां प्रदर्शयितुं हरिश्चन्द्र महाराज्ञः कथा अत्र विशेषतया वर्णितः

अस्य पुराणस्य अन्यः एकः विशेषः अस्ति

महर्षिः विश्वामित्रः भगवतः संकल्पानुसारेण हरिश्चन्द्रं प्रति नानाविध क्लेशं दत्तवान. तदा पंचसंख्याकाः विश्वे देवाः तत्क्लेशं दृष्ट्वा भगवतः संकल्पं अविज्ञाय तत्र विश्वामित्रऋषेः क्रौर्यः अधिकः अभवत इति मत्वा ते देवाः विश्वामित्रः कथं क्रूरीति उद्गारं प्रकटितवन्तः. तदा विश्वामित्रऋषिः गौप्येण कोपेन तान प्रति युयं सर्वे मनुष्यरूपेण भूमौ अवतरतु इति शप्तवान. ते एव द्रौपदी पुत्रत्वेन संजातो भूत्वा अश्वथाम्ना संहृत्य पुनः देवलोकं प्राप्तवन्तः एवं इदं पुराणं अनेक अपूर्व विषयान बोधयति।

उपसंहारं ;– पुराणविषये प्राचीनोक्तिः एवं अस्ति. ऋग्वेद,यजुर्वेद,स–

ामवेद, अथर्वणवेदाः अपौरुषेयाः व्सन्ति. परन्तु वेदार्थं प्रकटयितुं अष्टादशपुराणाः संजाताः अत एव पुराणाः पौरुषेय वेदाः इति प्रसिद्धाः सन्ति. एतादृश पुराणेषु भगवतः सृष्टिप्रकरणं,देवतानां सृष्टिः चतुर्दशाणि मन्वन्तराणि कथं भवतीति ? तेषां नामानि कानि ? तथैव रामकृष्णादिरूपाणां चारु चारित्र्यं ,तथैव रामकृष्णादि भगवतः उपदेशेन जीवनस्य सार्वकालिक मौल्यान कथं सम्पादयितुं शक्यः इति. नीतिः वर्णितः . एवं अष्टादश पुराणाः सार्वकालिक मार्गदर्शकाः भवन्ति

## Reference:

१. के.एस कौशिक मार्कण्डेय पुराण भारत दर्शन प्रकाशन
२. राधेश्याम खेमका गरुड्पुराण गीता प्रकाशन
३. पं फंढरीनाथाचार्य गलगलि मस्त्य पुराण
४. पं पद्मनाभाचार्य नरसिंह पुराण
५. पं फंढरीनाथाचार्य गलगलि कूर्म पुराण
६. पं पद्मनाभाचार्य विष्णुपुराण

**Funding:**
This study was not funded by any grant.

**Conflict of interest:**
The Authors have no conflict of interest to declare that they are relevant to the content of this article.

**About the License:**
© The Authors 2024. The text of this article is open access and licensed under a Creative Commons Attribution 4.0 International License.